# Brahmakritam Rudra Stotram

# ब्रह्मकृतं रुद्रस्तोत्रम्

## Document Information

Text title : Brahmakritam Rudra Stotram

File name : brahmakRRitaMrudrastotram.itx

Category : shiva, brahmavaivartapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 48/10-18||

Latest update : March 29, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 29, 2025

*sanskritdocuments.org*

# ब्रह्मकृतं रुद्रस्तोत्रम्

दृष्ट्वा ब्रह्मा हरं रुष्टं तुष्टाव परमेश्वरम् ।
चतुर्वक्त्रेण वेदोक्तस्तोत्रेण जगतां पतिः ॥ ९॥

ब्रह्मोवाच ।
प्रसीद दक्षयज्ञघ्न सूर्यं मच्छरणागतम् ।
त्वयैव सृष्टं सृष्टेश्च समारम्भे जगद्गुरो ॥ १०॥

आशुतोष महाभाग प्रसीद भक्तवत्सल ।
कृपया च कृपासिन्धो रक्ष रक्ष दिवानिशम् ॥ ११॥

ब्रह्मस्वरूप भगवन्सृष्टिस्थित्यन्तकारण ।
स्वयं रविं च निर्माय स्वयं संहर्तुमिच्छसि ॥ १२॥

स्वयं ब्रह्मा स्वयं शेषो धर्मः सूर्यो हुताशनः ।
इन्द्रचन्द्रादयो देवास्त्वत्तो भीताः परात्पर ॥ १३॥

ऋषयो मुनयश्चैव त्वां निषेव्य तपोधनाः ।
तपसां फलदाता त्वं तपस्त्वं तपसां फलम् ॥ १४॥

इत्येवमुक्त्वा ब्रह्मा तं सूर्यमानीय भक्तितः ।
प्रीत्या समर्पयामास शङ्करे दीनवत्सले ॥ १५॥

शम्भुस्तमाशिषं कृत्वा विधिं नत्वा जगद्विधिः ।
प्रसन्नवदनः श्रीमानालयं प्रययौ मुदा ॥ १६॥

इति धातृकृतं स्तोत्रं सङ्कटे यः पठेन्नरः ।
भयात्प्रमुच्यते भीतो बद्धो मुच्येत बन्धनात् ॥ १७॥

राजद्वारे श्मशाने च मग्नपोते महार्णवे ।
स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशयः ॥ १८॥

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे पूर्वे

अष्टचत्वारिंशाध्यायान्तर्गतं
ब्रह्मकृतं रुद्रस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । श्रीकृष्णजन्म, पूर्वभाग । अध्याय ४८/१०-१८॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 48/10-18..

Proofread by PSA Easwaran

---

*Brahmakritam Rudra Stotram*
pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*